# मूर्खवानरः

नर्मदातीरे एकः वृक्षः आसीत्। तत्र स्वपरिश्रमेण निर्मितेषु नीडेषु खगाः सुखेन वसन्ति स्म। तत्र वृक्षतले कश्चित् वानरः अपि वसति स्म। एकदा महती वृष्टिः अभवत्। सः वानरः वृष्टिजलेन अतीव आर्द्रः कम्पितः च अभवत्। खगाः शीतेन कम्पमानम् वानरम् अवदन् –"भो वानर! त्वम् कष्टम् अनुभवसि। तत् कथम् गृहस्य निर्माणम् न करोषि।" यदा सः वानरः एतत् अशृणोत् तदा सः अचिन्तयत् – "अहो! एते क्षुद्राः खगाः माम् निन्दन्ति। अतः सः वानरः खगानाम् नीडानि वृक्षात् अधः अपातयत्। खगानाम् नीडैः सह तेषाम् अण्डानि अपि नष्टानि।